grahaNapIDAparihArashlokAH

# ग्रहणपीडापरिहारश्लोकाः

## Document Information


Text title : Grahana PidAparihAra Shlokah

File name : grahaNapIDAparihArashlokAH.itx

Category : navagraha

Location : doc_z_misc_navagraha

Latest update : December 26, 2022

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


December 26, 2022

*sanskritdocuments.org*

grahaNapIDAparihArashlokAH

# ग्रहणपीडापरिहारश्लोकाः

ग्रहणशान्तिश्लोकः -

इन्द्रोऽनलो दण्डधरश्च रक्षः
    प्राचेतसो वायुकुबेरशर्वाः ।
मज्जन्मऋक्षे मम राशिसंस्थे
    सूर्योपरागं शमयन्तु सर्वे ॥

अथ ग्रहणपीडापरिहारश्लोकाः ।
योऽसौ वज्रधरो देवः आदित्यानां प्रभुर्मतः ।
सहस्रनयनः शक्रः ग्रहपीडां व्यपोहतु ॥ १॥

मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ।
चन्द्रसूर्योपरागोत्थां अग्निः पीडां व्यपोहतु ॥ २॥

यः कर्मसाक्षी लोकानां यमो महिषवाहनः ।
चन्द्रसूर्योपरागोत्थां ग्रहपीडां व्यपोहतु ॥ ३॥

रक्षो गणाधिपः साक्षात् प्रलयानलसन्निभः ।
उग्रः करालो निर्ऋतिः ग्रहपीडां व्यपोहतु ॥ ४॥

नागपाशधरो देवः सदा मकरवाहनः ।
वरुणो जललोकेशो ग्रहपीडां व्यपोहतु ॥ ५॥

यः प्राणरूपो लोकानां वायुः कृष्णमृगप्रियः ।
चन्द्रसूर्योपरागोत्थां ग्रहपीडां व्यपोहतु ॥ ६॥

योऽसौ निधिपतिर्देवः खड्गशूलधरो वरः ।
चन्द्रसूर्योपरागोत्थां कलुषं मे व्यपोहतु ॥ ७॥

योऽसौ शूलधरो रुद्रः शङ्करो वृषवाहनः ।
चन्द्रसूर्योपरागोत्थां दोषं नाशयतु द्रुतम् ॥ ८॥

ॐ शान्तिः शान्तिः शान्तिः ।

इति ग्रहणपीडापरिहारश्लोकाः सम्पूर्णाः ।

*grahaNapIDAparihArashlokAH*

pdf was typeset on December 26, 2022

Please send corrections to *sanskrit@cheerful.com*